अग्निमभ्यर्च्य मन्त्रेण हुत्वा चाष्टाहुतीः सतीः ।
चक्रशङ्खगदादीनि शस्त्राण्यग्नौ प्रतापयेत् ॥
ततस्तत्रैरयावाह्य तान्यभ्यर्च्य प्रणम्य च ।
गुरुं सम्पाद्य संवन्द्य भक्त्या विज्ञापयेदिदम् ॥
उच्छिष्टभोजनादेव किङ्करः शरणागतः ।
तप्तचक्रगदादीनि तवाङ्कानीश ! धारये ॥ इति ॥
अथ चक्रादीनामावाहनादिमन्त्रः ।
ओम् नमो भगवते सुदर्शनाय निर्व्वाणितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहस्पर्शदुर्ललिताय ।
एह्येहि त्वं सहस्रार चक्रराज सुदर्शन ! ।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः ॥
ओम् नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरधीरध्वन्याकुलीकृतकौरववाहिनीनाथाय त्रिरेखादक्षिणावर्त्ताय त्रिप्रशस्ताय ।
एह्येहि पाञ्चजन्य ! त्वं नारायणकरस्थित ! ।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः ॥
ओम् रं णं मं नं पाञ्चजन्याय नमः ॥ ओम् भगवते खड्गाय नन्दकाय त्रैलोक्यपावित्राय जयिने सकलसुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय ॥
एह्येहि खड्गरत्न ! त्वं नन्दकाख्य सुरार्च्चित ! ।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः ॥
ओम् खड्गाय नमः ॥ ओम् नमो भगवत्यै कौमोदक्यै गदायै दानवेन्द्रनिषूदनायै भगवद्भट्टारकवासुदेवलालितायै ।
एह्येहि त्वं गदे ! देवि कौमोदक्यायुधेश्वरि ! ।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः ॥
ओम् रं खं चं कं सं गदायै नमः ॥ एवं पद्माय नमः । सशराय शार्ङ्गाय नमः । इति ॥ * ॥
अथ धारणमन्त्रः ।
सुदर्शन ! महाध्वान सूर्य्यकोटिसमप्रभ ! ।
अज्ञानान्धस्य मे नित्यं विष्णोर्म्मार्गं प्रदर्शय ॥
तथा ।
पाञ्चजन्य ! निजध्वानध्वस्तपातकसञ्चय ।
पाहि मां पापिनं घोरसंसारार्णवपातिनमिति ॥
इत्युच्चारयन् मन्त्रं दक्षिणादिक्रमेण तु ।
भुजयोश्चक्रपूर्व्वाणि तप्तशस्त्राणि धारयेत् ॥
कलत्रादिपरीवारान् निजान् सर्व्वांश्च वैष्णवः ।
भगवत्यर्पयन् तप्तमुद्राभिस्ताभिरङ्कयेत् ॥
तथा च । वाराहे ।
अङ्कयेत्तप्तचक्राद्यैरात्मनो बाहुमूलयोः ।
कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदे ॥
किञ्च ।
आयसं विधिवत् कृत्वा पञ्चायुधविधानतः ।
ततस्तल्लिङ्गमन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक् ॥
ललाटे च गदा धार्य्या मूर्द्ध्नि चापं शरस्तथा ।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये ॥
किञ्च ।
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।
सव्ये च शङ्खं बिभृयादिति ब्रह्मविदो विदुः ॥
अथ चक्रादिप्रतिकृतिद्वयम् । नवप्रश्नप्रपञ्चरात्रे ।

सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा ।
चक्रं कृत्वा तु मेधावी धारयेत विचक्षण इति ॥
एवमेव प्रबोधन्यां द्वादश्यां भगवत्परैः ।
तप्तमुद्रा ध्रुवं धार्य्या द्वारकायां विशेषतः ॥
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

तप्तरूपकं, क्ली, (तप्तं वह्निशोधितं रूपकं रूप्यम् ।) शुद्धरौप्यम् । इति राजनिर्घण्टः ॥

तप्तशूर्म्मिकुण्डं, क्ली, (तप्ता अग्निमयी शूर्म्मिः लौहप्रतिमूर्त्तिर्यत्र । तथाविधं कुण्डं यस्मिन् ।) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तप्तसुराकुण्डं, क्ली, (तप्तायाः सुरायाः कुण्डमिव ।) नरकविशेषः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

तम, उ इर् भ य खेदे । इच्छायाम् । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-सेट् ।) उ, तमित्वा तान्त्वा । इर्, अतमत् अतमीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । भ य, ताम्यति लोकः उत्तप्तः स्यादित्यर्थः । इति दुर्गादासः ॥

तमं, क्ली, (ताम्यत्यस्मादनेन वा । तम+अपादाने करणे वा संज्ञायां घः ।) अन्धकारः । इति शब्दरत्नावली ॥ पादाग्रम् । इति शब्दचन्द्रिका ॥

तमः, पुं, (ताम्यत्यनेनेति । तम+संज्ञायां घः ।) तमोगुणः । इत्यमरटीकायां रायमुकुटः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥ (राहुः । इत्यमरः ।१।३।२६। यथा, ज्योतिषि होरायाम् । "भृगुतमबुधजीवैरिति । कितवस्तमस्येति वराहः ॥" इति उणादिवृत्तिटीकायां उज्ज्वलदत्तः । ४ । १८८ ॥)

तमः, [स्] क्ली, (ताम्यत्यनेनेति । तम+"सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इति असुन् ।) प्रकृतेर्गुणविशेषः । यथा,—
"सत्त्वं रजस्तम इति इष्यन्ते पुरुषे गुणाः ।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि ॥
प्रभूतश्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्यात् ज्ञाने तपसि यद्रतिः ॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक ! ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्म्मणाञ्चापि काम्यानां द्वापरस्तद्रजस्तमः ॥
यदा सदानृतं तन्द्री निद्राहिंसादिसाधनम् ।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः ॥"
इति गारुडे २२७ अध्यायः ॥ * ॥
अपि च ।
"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ! ॥
सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत ! ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत ! ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥"
"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ! ॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते ॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥
कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति श्रीभगवद्गीतायाम् । १४ । ८-१८ ॥
तत्तु आवरकं मोहहेतुः । इत्यमरभरतौ ॥ अस्य कार्य्यं संहारः । इति श्रीधरस्वामी ॥ तस्य धर्म्मो यथा । प्रमादः १ मोहः २ भयम् ३ क्लान्तिः ४ विषादः ५ शोकः ६ अरतिः ७ अनार्य्यता ८ । इति मोक्षधर्म्मः ॥ श्रमः ९ तन्द्रा १० । इत्याश्वमेधिकपर्व्व ॥ अन्धकारः । (यथा, महाभारते । १ । १०५ । १० ।
"तमसा लोकमावृत्य नौगतामेव भारत ! ॥")
तत्पर्य्यायः । तमसम् २ निशाचर्म्म ३ नीलपङ्कम् ४ रजोबलम् ५ दिवान्तकः ६ वियद्भूतिः ७ खशुक् ८ त्वचः ९ । इति त्रिकाण्डशेषः ॥ रजोरसम् १० दिनान्तरम् ११ अन्धकम् १२ । इति शब्दरत्नावली ॥ अमरोक्तपर्य्यायोऽन्धकारशब्दे द्रष्टव्यः ॥ शोकः । इति मेदिनी । से, २४ ॥ पापम् । इति हेमचन्द्रः ॥ (राहुः । इति मेदिनी । से, २४ ॥ यथा, रघुः । ८ । ३७ ।
"निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी ॥")

तमङ्गकः, पुं, इन्द्रकोषः । मञ्चकः । इति हेमचन्द्रत्रिकाण्डशेषश्च ॥

तमतः, त्रि, (तम+"भृन्दृशीङ्यजिपर्व्विपच्यमितमीति ।" उणां । ३ । ११० । इति अतच् ।) तृषितः । वाञ्छितः । इत्युणादिकोषः ॥

तमप्रभः, पुं, (तम इव प्रभाऽस्य अस्मिन् वा ।) नरकभेदः । इति हेमचन्द्रः ॥

तमरं, क्ली, (तमं राति । रा+कः ।) वङ्गम् । इति हेमचन्द्रः ॥

तमराजः, पुं, (तम इव राजते । राज+अच् ।) शर्कराविशेषः । नवात इति ख्यातइति केचित् । तत्पर्य्यायः । शालकः २ । तस्य गुणः । तृष्णाज्वरदाहरक्तपित्तनाशित्वम् । इति राजवल्लभः ॥

तमसं, क्ली, (तम+"अत्यविचमितमीति ।" उणां । ३ । ११७ । इति असच् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ नगरम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तमसः, पुं, (तम+असच् ।) कूपः । अन्धकारः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

तमसा, स्त्री, (तमइव जलमस्यस्याः । अच् टाप् च ।) नदीविशेषः । इति संक्षिप्तसारेउणादिवृत्तिः ॥ (यथा, महाभारते । ३ । २२१ । २४ । "तमसा नर्म्मदा चैव नदी गोदावरी तथा ॥")